# संस्कृतवार्ताः

दिनाङ्क :- 20.01.2026

प्रात: - 06:55

प्रधानमंत्री-यू.ए.ई. राष्ट्रपति

प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्यां संयुक्त-अरब्-अमिरात्-देशस्य राष्ट्रपतिना शेख् मोहम्मद् बिन् जायद् अल् नह्यान् इत्यनेन सह स्वीयाधिकारिकावासे प्रतिनिधि-स्तरीया वार्ता कृता। अस्मिन् उपवेशने भारत-यू.ए.ई. देशयोः मध्ये अनेकेषु सन्धिपत्रेषु हस्ताक्षराणि जातानि। सभायाः परिणामानां विषये वार्ताहरान् सम्बोधयन् विदेशसचिवः विक्रम मिसरी इत्येषः अवदत् यत्, सामरिकरक्षा-सहभागितायै, अन्तरिक्षस्य मूलसौकर्याणां अभिवृद्धये वाणिज्यीकरणाय च सन्धिपत्रेषु हस्ताक्षराणि जातानि। श्रीमिसरी अवदत् यत् गुजरातस्य धोलेरा-नगरे विशेष-निवेश-क्षेत्रस्य विकासे यू.ए.ई. इत्यस्य सहभागितायै अपि सहमतिः अभवदिति।

आईएमएफ – भारतस्य आर्थिकवृद्धिः

आईएमएफ इति अन्ताराष्ट्रिय-मुद्रा-कोषेण पञ्च-विंशत्यधिक-द्वि-सहस्र-तम-वर्षार्थं भारतस्य आर्थिक-वृद्धि-परिमितेः अनुमानं संवर्ध्य प्रतिशतं दश-मलवोत्तर त्र्यधिक-सप्तमिता कृता अस्ति। विश्व-आर्थिक-परिदृश्यस्य वार्तायाम् आईएमएफ-कोषेण प्रोक्तं यत् प्रवर्तमान-वित्त-वर्षस्य चतुर्थ्यां त्रैमासिक्यां सुदृढ-आर्थिक-गति-कारणेन एतत् संशोधनं कृतम् अस्ति।

## वैश्विकार्थिकमञ्च – डावोस, स्विट्ज़रलैंड

स्विट्ज़रलैंड देशस्य दावोस-मध्ये विश्व-आर्थिक-मञ्चस्य षट्-पञ्चाशं वार्षिकं सम्मेलनं प्रारभते। एतस्मिन् सम्मेलने त्रि-सहस्र-तोऽपि अधिका: वैश्विका: नेतार: प्रतिभागितां कुर्वन्ति।

भारतादपि शताधिका: सी.ई.ओ. अधिकारिण: बृहत् प्राशासनिकं प्रतिनिधि-मंडलीयं दलं पञ्च-दिवसीय सम्भाषणोपवेशने सम्मिलितम् अस्ति।

शिखरसम्मेलनस्य उद्घाटने दिने महाराष्ट्र-सर्वकारेण त्रि-सप्तत्यधिकैक-शत बिलियन्-डालर् प्रायः पञ्चदशमलवोत्तर चतुर्दश लक्ष-कोटिरूप्यकाणां निवेश-सहमति-पत्रं प्राप्तम्।

## भाजपा-कार्यकारी अध्यक्ष

भाजपेति दलस्य कार्यकारी अध्यक्षः नितिन नबीनः दलस्य नूतनः राष्ट्रियः अध्यक्षः निर्वाचितः। भाजपेति दलस्य राष्ट्रिय-निर्वाचन-अधिकारिणा डॉ. के. लक्ष्मणेन घोषितं यत् भाजपेति दलस्य राष्ट्रिय-अध्यक्षपदस्य कृते केवलं श्रीनबीनस्य नाम एव प्रस्तावितम्। परञ्च तस्य नूतन-राष्ट्रिय-अध्यक्ष-रूपेण निर्वाचनस्य औपचारिक-घोषणा अद्य भविष्यति।

## कृषि-कृषक-कल्याण-मन्त्रिणा शिवराज-सिंहेन कांग्रेसदलम् आरोपितम्

कृषि-कृषक-कल्याण-मन्त्रिणा शिवराज-सिंहेन कांग्रेसदलम् अधिक्षिप्तं यत् विकसित-भारत जी राम जी अधिनियमस्य प्रकरणे कांग्रेस-दलं देशवासिषु भ्रान्तिं जनयति। नव-दिल्ल्यां चौहानवर्य: प्रत्यपादयत् यत् मनरेगा-योजनायाः अन्तर्गतं कांग्रेस-दलेन प्रदत्ता:

अधिकारा: केवलं कर्गदेषु एव निजम् अस्तित्वं धारयन्ति स्म, वास्तविक-धरातले नासीत् अस्तित्वं तेषाम्।

<u>गणतन्त्र-दिवसः – विशेषातिथयः</u>

रक्षामन्त्रालयेन प्रतिपाद्यते यत् एतस्मिन् वर्षे नव-दिल्ल्यां कर्तव्य-पथे आयोक्ष्यमाणं सप्त-सप्ततितमं गणतन्त्र-दिवसीयं सैन्य-प्रयाणम् अवलोकयितुं प्रायः दश-सहस्र-मिताः विशिष्टाः अतिथयः आमन्त्रिताः सन्ति।

एतेषु अतिथिषु आय-सर्जने, जीविका-सर्जने च उत्कृष्ट-कार्यकर्तारः, श्रेष्ठाः नवोन्मेषकाः, स्टार्ट-अप-प्रतिनिधयः, स्वयं-सहायता-समूहानां सदस्याः, विभिन्नानां सर्वकारीय-योजनानां उत्कृष्ट-लाभार्थिनः च समाविष्टाः सन्ति।

एतदतिरिच्य, विश्व-पैरा-एथलेटिक्स-चैम्पियनशिप-स्पर्धायाः विजेतारः, पी.एम-स्माइल-योजनायाः अन्तर्गतं पुनर्वासिताः ट्रांसजेंडर-इत्याख्याः जनाः, भिक्षुकाः तथा प्राकृतिक-कृषि-कर्तारः कृषकाः अपि विशिष्ट-अतिथिषु सम्मिलिताः सन्ति। अस्य आयोजनस्य उद्देश्यः राष्ट्र-निर्माणे योगदान-कर्तॄणां सम्माननम् इति वर्तते।